DEEPTI SHARMA
CLASS VIII C



**अभ्यास-प्रपत्रम्**



## अपठित-अनुच्छेदाः

नाम.................................... कक्षा.............. वर्ग.............. अनुक्रमांक..............

**निम्नलिखित अनुच्छेदान् पठित्वा प्रश्नान् उत्तरत–**

निम्नलिखित अनुच्छेदों को पढ़कर प्रश्नों के उत्तर दीजिए–

**1.** अद्य छात्राः कीदृशाः सन्ति कोऽपि न जानाति। अद्यत्वे छात्राणां रुचिः पठने तु नैव अस्ति। ते पठनम् अतिरिच्य तु अन्यत् सर्वम् एव कर्तुं समर्थाः। ते सर्वदा खेलने नर्तने भ्रमणे एव रताः भवन्ति परं पठने तु न एव। यदा एव पठनस्य कालः भवति तदा ते स्वकालम् इतस्ततः कृत्वा नयन्ति। एवम् एव ते स्वकालं नयन्ति।

I. एकपदेन उत्तरत–

(*i*) केषां रुचिः पठने नैव अस्ति?

(*ii*) छात्राणां रुचिः कस्मिन् न अस्ति?

II. पूर्णवाक्येन उत्तरत–

वर्तमानकाले छात्राः कस्मिन् रताः सन्ति।

III. निर्देशानुसारम् उत्तरत–

(*i*) 'भवन्ति' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(क) रुचिः (ख) छात्राः (ग) कालः (घ) ते

(*ii*) 'छात्राः' अस्य किं क्रियापदम् अत्र प्रयुक्तम्?

(क) सन्ति (ख) नयन्ति (ग) भवन्ति (घ) अस्ति

(*iii*) 'परित्यज्य' इत्यर्थे किं पदं प्रयुक्तम्?

(क) इतस्ततः (ख) अतिरिच्य (ग) रताः (घ) अन्यत्

(*iv*) 'एवम् ते कालं नयन्ति' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम?

(क) एवम् (ख) ते (ग) कालम् (घ) नयन्ति

**2.** अद्य सर्वे जनाः अधिकारस्य इच्छां कुर्वन्ति। तेषां कर्त्तव्यं किम् अस्ति इति कोऽपि न जानाति। एषः मम अधिकारः इति तु सर्वे कथयन्ति। यदि अद्य वयम् अधिकारं परित्यज्य एतद् मम कर्त्तव्यम् इति विचार्य कार्यं कुर्याम तदा तु सर्वाः एव समस्याः स्वतः एव दूरी भविष्यन्ति।


© Rachna Sagar Pvt. Ltd.

I. एकपदेन उत्तरत–

(*i*) सर्वे जनाः कस्य इच्छां कुर्वन्ति?

(*ii*) के अधिकारस्य इच्छां कुर्वन्ति?

II. पूर्णवाक्येन उत्तरत–

सर्वे किं कथयन्ति?

III. निर्देशानुसारम् उत्तरत–

(*i*) 'जनाः' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(क) सर्वः (ख) सर्वा (ग) सर्वे (घ) सर्वाः

(*ii*) 'कथयन्ति' अस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(क) सर्वः (ख) सर्वा (ग) सर्वाः (घ) सर्वे

(*iii*) 'त्यक्त्वा' इत्यर्थे किं पदं प्रयुक्तम्?

(क) परित्यज्य (ख) विचार्य (ग) दूरीकृत्य (घ) अधिकृत्य

(*iv*) 'तेषां कर्त्तव्यं किम् अस्ति' अस्मिन् वाक्ये 'तेषां' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) जनाः (ख) जनेभ्यः (ग) जनान् (घ) जनैः

**3.** अद्य छात्राणां प्रवृत्तिः तु परिवर्तिता एव। ते पठनम् अतिरिच्य ईदृशेषु कार्येषु संलग्नाः जाताः येन तेषां ह्रासः एव भवति उत्थानं तु न। छात्रकाले यदि ते ईदृशेषु कार्येषु रताः भविष्यन्ति तदा तेषां भाविजीवनम् अन्धकारमयम् एव भविष्यति। अतः छात्राणां प्रवृत्तिः ईदृशी न भवेत् एतदर्थं प्रतिदिनं नैतिकमूल्यानां शिक्षणम् अनिवार्यम्।

I. एकपदेन उत्तरत–

(*i*) केषां प्रवृत्तिः परिवर्तिता?

(*ii*) छात्राः किम् अतिरिच्य अन्येषु कार्येषु संलग्नाः सन्ति?

II. पूर्णवाक्येन उत्तरत–

प्रतिदिनं केषां शिक्षणम् अनिवार्यम्?

III. निर्देशानुसारम् उत्तरत–

(*i*) 'कार्येषु' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(क) ईदृशः (ख) ईदृशम् (ग) ईदृशेषु (घ) ईदृशी

(*ii*) 'भविष्यन्ति' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(क) सः (ख) तौ (ग) ते (घ) छात्राः

(*iii*) 'तेषां ह्रासः एव भवति' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम?

(क) तेषाम् (ख) ह्रासः (ग) एव (घ) भवति

(*iv*) 'अपरिवर्तिता' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) परिवर्तितः (ख) परिवर्तितम् (ग) परिवर्तिता (घ) परिवर्तिताम्

**4.** छात्राः यदा भ्रमणार्थं गच्छन्ति तदा ते अतिप्रसन्नाः भवन्ति। यतः ते स्वच्छन्दाः भवन्ति। मानवाः यदा स्वच्छन्दाः भवन्ति तदा ते सुखम् अनुभवन्ति। विद्यालयस्य अन्तः ते नियमेन बद्धाः भवन्ति। नियमानाम् अनुपालनं तेषां कृते अनिवार्यम् भवति।

I. एकपदेन उत्तरत–

(*i*) के भ्रमणार्थं गच्छन्ति?

(*ii*) विद्यालयस्य अन्तः छात्राः केन बद्धाः भवन्ति।

II. पूर्णवाक्येन उत्तरत–

छात्राः कदा प्रसन्नाः भवन्ति?

III. निर्देशानुसारम् उत्तरत–

(*i*) 'गच्छन्ति' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(क) छात्रः (ख) छात्रौ (ग) छात्रान् (घ) छात्राः

(*ii*) 'तदा ते सुखम् अनुभवन्ति' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

(क) तदा (ख) ते (ग) सुखम् (घ) अनुभवन्ति

(*iii*) 'मुक्ताः' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) बद्धः (ख) बद्धम् (ग) बद्धा (घ) बद्धाः

(*iv*) 'अनिवार्यम्' अस्य किं क्रियापदम् अत्र प्रयुक्तम्?

(क) भवन्ति (ख) अनुभवन्ति (ग) भवति (घ) गच्छन्ति

**5.** अद्य महानगराणां विकासेन संयुक्तपरिवारस्य प्रचलनं तु न एव। अद्य सर्वत्र एकल परिवारस्य एव प्रचलनं दृश्यते। एकलपरिवारे यद्यपि जनानां सम्मुखे अनेकाः समस्याः आगच्छन्ति परं तथापि मानवः एकलपरिवारे एव स्थातुम् वाञ्छति।


© Rachna Sagar Pvt. Ltd.

I. एकपदेन उत्तरत–

(*i*) अद्य कस्य प्रचलनं न अस्ति?

(*ii*) अद्य कस्य प्रचलनं दृश्यते?

II. पूर्णवाक्येन उत्तरत–

मानवः कथं स्थातुम् वाञ्छति?

III. निर्देशानुसारम् उत्तरत–

(*i*) 'समस्याः' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(क) अनेकानि (ख) अनेके (ग) अनेकाः (घ) अनेकम्

(*ii*) 'मानवः' अस्य किं क्रियापदम् अत्र प्रयुक्तम्?

(क) वाञ्छति (ख) वाञ्छतः (ग) वाञ्छसि (घ) वाञ्छामि

(*iii*) 'गच्छन्ति' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) आगच्छति (ख) आगच्छतः (ग) आगच्छसि (घ) आगच्छन्ति

(*iv*) 'एकलपरिवारे एव स्थातुम् वाञ्छति' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

(क) सकलपरिवारे (ख) एव (ग) स्थातुम् (घ) वाञ्छति


© Rachna Sagar Pvt. Ltd.

# उत्तराणि

## 17. अपठित-अनुच्छेदाः

1. **I.** (*i*) छात्राणाम् (*ii*) पठने

**II.** वर्तमाने छात्राः खेलने नर्तने भ्रमणे च रताः भवन्ति।

**III.** (*i*) (ख) छात्राः (*ii*) (क) सन्ति

(*iii*) (ख) अतिरिच्य (*iv*) (क) एवम्

2. **I.** (*i*) अधिकारस्य (*ii*) जनाः

**II.** सर्वे कथयन्ति – एषः मम अधिकारः अस्ति।

**III.** (*i*) (ग) सर्वे (*ii*) (घ) सर्वे

(*iii*) (क) परित्यज्य (*iv*) (ख) जनेभ्यः

3. **I.** (*i*) छात्राणाम् (*ii*) पठनम्

**II.** प्रतिदिनं नैतिकमूल्यानां शिक्षणम् अनिवार्यम्।

**III.** (*i*) (क) ईदृशे (*ii*) (ग) ते

(*iii*) (ग) एव (*iv*) (ग) परिवर्तिता

4. **I.** (*i*) छात्राः (*ii*) नियमेन

**II.** छात्राः तदा प्रसन्नाः भवन्ति यदा ते भ्रमणार्थं गच्छन्ति।

**III.** (*i*) (घ) छात्राः (*ii*) (क) तदा

(*iii*) (ग) बद्धाः (*iv*) (ग) भवति

5. **I.** (*i*) संयुक्तपरिवारस्य (*ii*) एकलपरिवारस्य

**II.** मानवः एकलपरिवारे स्थातुं वाञ्छति।

**III.** (*i*) (ग) अनेकाः (*ii*) (क) वाञ्छति

(*iii*) (घ) आगच्छन्ति (*iv*) (ख) एव


© Rachna Sagar Pvt. Ltd.